UNIVERSITY OF CAMBRIDGE

EXAMINATION IN ASIAN AND MIDDLE EASTERN STUDIES FOR THE DEGREE OF MASTER OF PHILOSOPHY

1-Year MPhil in Sanskrit and South Asian Studies

Friday 4 June 2010 09.00 – 12.00

SA.3 TEXTS IN CONTEXT: VEDANTA AND ITS SOURCES

Answer **ALL** questions.

STATIONERY REQUIREMENTS
20 Page Answer Book x 1
Rough Work Pad

SPECIAL REQUIREMENTS
None

You may not start to read the questions printed on the subsequent pages of this question paper until instructed that you may do so by the Invigilator.

1 (a) Translate into English [20 marks]:

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन् स्रवेद्यो मध्येऽभ्याहन्या-ज्जीवन् स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन् स्रवेत् । स एष जीवेनाऽऽत्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥ १ ॥

a) ऋ 7·77·3 चित्रामघा विश्वमनु प्रभूता; 8·58·2 एकः सूर्यो विश्वमनु प्रभूतः; शब्रा 10·6·3·2 सर्वा अनु दिशः प्रभूतम्.

अस्य यदेकाꣳ शाखां जीवो जहात्यथ सा शुष्यति । द्वितीयां जहात्यथ सा शुष्यति । तृतीयां जहात्यथ सा शुष्यति । सर्वं जहाति सर्वः शुष्यति ॥ २ ॥

एवमेव खलु सोम्य विद्धीति होवाच । जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति । स य एषोऽणिमैतदात्म्यमिदꣳ सर्वम् । तत्सत्यम् । स आत्मा । तत्त्वमसि श्वेतकेतो इति । भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ॥ ३ ॥

a) Plato, *Phaedon* 52–54.

॥ इति एकादशः खण्डः ॥

न्यग्रोधफलमत आहरेति । इदं भगव इति । भिन्द्धीति । भिन्नं भगव इति । किमत्र पश्यसीति । अण्व्य इवेमा धाना भगव इति । आसामङ्गैकां भिन्द्धीति । भिन्ना भगव इति । किमत्र पश्यसीति । न किंचन भगव इति ॥ १ ॥

तꣳ होवाच — यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्यग्रोधस्तिष्ठति । श्रद्धत्स्व सोम्येति ॥ २ ॥

a) छां 6·13·2. —*b*) ऋ 2·12·5 श्रदस्मै धत्त; cp श्रद्धा कामायनी as the ऋषि of the सूक्त 10·151; पा 1·4·66 कणेमनसी श्रद्धाप्रतीघाते; 5·2·101 प्रज्ञाश्रद्धार्चाभ्यो णः.

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वम् । तत्सत्यम् । स आत्मा । तत्त्वमसि श्वेतकेतो इति । भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ॥ ३ ॥

॥ इति द्वादशः खण्डः ॥

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति । स ह तथा चकार । तꣳ होवाच । यद्दोषा[a] लवणमुदकेऽवाधा अङ्ग तदाहरेति । तद्धावमृ[b]श्य न विवेद ॥ १ ॥

a) ऋ 2·8·3 दोषोषसि प्रशस्यसे; अ 6·1·1 दोषो गाय बृहद्गाय. —*b*) अ 7·64·2 इदं यत्कृष्णः शकुनिरवामृक्षत्; तैसं 3·2·6·1 यत्कृष्णशकुनः पृषदाज्यमवमृशेत्, शूद्रा अस्य प्रमायुकाः स्युः.

यथा विलीनमेव । अङ्गास्यान्ता[a]दाचामेति । कथमिति । लवणमिति । मध्या[a]दाचामेति । कथमिति । लवणमिति । अन्ता[a]दाचामेति । कथमिति । लवणमिति । अभि[b]प्रास्य[1]ैतदथ मोपसीदथा इति । तद्ध तथा चकार । तच्छश्वत्संवर्तते[2] । तꣳ होवाचात्र वाव किल तत्सोम्य न निभालयसेऽत्रैव किलेति ॥ २ ॥

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वम् । तत्सत्यम् । स आत्मा । तत्त्वमसि श्वेतकेतो इति । भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ॥ ३ ॥

Chāndogya Upaniṣad 6.11-13

(b) Comment grammatically on the forms *vijñāpayatu* and *binddhi*, and on the syntax of the expression *tat tvam asi*, occurring in the above passage. [10 marks]

2 (a) Translate into English [20 marks]:

प्लवा[a] ह्येते अदृढा यज्ञरूपा अष्टा[b]दशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति ॥ ७ ॥

a) ऋ 1·182·5 युवमेतं चक्रथुः सिन्धुषु प्लवम्; अ 12·2·48. —*b*) मुं 1·1·5 : Four Vedas × 3 (संहिता + ब्राह्मण + सूत्र) = 12 + six Vedāṅgas = 18 ?

अ[a]विद्यायामन्तरे वर्तमानाः स्वयंधीराः पण्डितंमन्यमानाः ।
जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥ ८ ॥

a) क 2·5; मै 7·9.

अविद्यायां बहुधा वर्तमाना वयं कृता[a]र्था इत्यभिमन्यन्ति बालाः ।
यत्कर्मिणो न प्रवेदयन्ति रागात् तेना[b]तुराः क्षीणलोकाश्च्यवन्ते ॥ ९ ॥

(TURN OVER

इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।
नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा इमं लोकं हीनतरं वा विशन्ति ॥ १० ॥
तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥ ११ ॥
परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ १२ ॥
तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ १३ ॥

Muṇḍaka Upaniṣad 1.2.7-13

(b) Comment grammatically on the forms *jaṅghanyamānāḥ*, *anubhūtvā* and *samitpāṇiḥ*, occurring in the above passage. [10 marks]

3 (a) Translate into English [20 marks]:

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ १०-६ ॥
एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥ १०-७ ॥
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ १०-८ ॥
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ १०-९ ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १०-१० ॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ १०-११ ॥

Bhagavadgītā 10.6-11

(b) Translate the commentary into English [20 marks]:

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ॥

नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

तेषामेव कथं नाम श्रेयः स्यादित्यनुकम्पार्थं दयाहेतोरहमज्ञानजमविवेकतो जातं मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमो नाशयाम्यात्मभावस्थ आत्मनो भावोऽन्तःकरणाशयस्तस्मिन्नेव स्थितः सन्। ज्ञानदीपेन विवेकप्रत्ययरूपेण भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मचर्यादिसाधनसंस्कारवत्प्रज्ञावर्तिना विरक्तान्तःकरणाधारेण विषयव्यावृत्तचित्तरागद्वेषाकलुषितनिवातापवरकस्थेन नित्यप्रवृत्तैकाग्र्यध्यानजनितसम्यग्दर्शनभास्वता ज्ञानदीपेनेत्यर्थः ॥ ११ ॥

Bhagavadgītābhāṣya 10.11

END OF PAPER